Total Pages : 4 B.A./1st Sem (H)/SANS/22/(CBCS)

MIDNAPORE CITY COLLEGE
ESTD 2017
CENTRAL LIBRARY

# 2022

## SANSKRIT (Honours)

### Paper : C 1-T

### [Classical Sanskrit Literature (Poetry)]

### (CBCS)

Full Marks : 60 Time : 3 Hours

*The figures in the margin indicate full marks. Candidates are required to give their answers in their own words as far as practicable.*

१। अधोलिखितेषु सुरगिरा देवनागर्या च **दश** प्रश्नाः समाधेयाः —

2×10=20

(क) कालिदासमते मनीषिणां माननीय कः ? तस्य माननीयता केन सह तुलिता ?

(ख) रघुवंशे कालिदासस्य गतिः किदृशी भवति ?

(ग) कथं रघुवंशकारः उपहास्यतां गमिष्यति ? आत्मनः रघुवंशवर्णनप्रचेष्टाविषये कविना अत्र कः दृष्टान्तः उपस्थापितः ?

(घ) मेना का ? सा कां महतो मुनिव्रतात् निवारयितुमचेष्टत ?

(ङ) कथं पुराविदः पार्वतीमपर्णेति वदन्ति ?

P.T.O.

MIDNAPORE CITY COLLEGE ESTD 2017 CENTRAL LIBRARY



(च) 'न तत्समन्विष्यत मृग्यते तत्' इति वाक्यस्य किं तात्पर्यम् ?

(छ) "तवाभिधानात् व्यथते नताननः" — कः कथं नताननः सन् व्यथते ?

(ज) केन प्रकारेण दुर्योधनः धर्मविप्लवं निहन्ति ?

(झ) "अदेवमातृक"-पदस्य कोऽर्थः ? कथं कुरवः अदेवमातृकाः जाताः ?

(ञ) भर्तृहरिमते पशूनां परमं भागधेयं किम् ?

(ट) सर्वविदां समाजे अपण्डितानां विभूषणं किम् ? पुरुषं किं समलंकरोति ?

(ठ) के लक्ष्मीं तृणमिव लघुरूपेण मन्यन्ते ?

(ड) शिशुपालस्य पितरौ कौ ?

(ढ) भट्टिकाव्ये काण्डसंख्या का ? तेषां नामानि लिखत।

(ण) जयदेवः कुत्र अवसत् ? तस्य पृष्टपोषकः नृपः कः आसीत् ?

२। अधोलिखितेषु प्रश्नचतुष्टयं समाधेयम् (एकस्य प्रश्नस्य उत्तरमवश्यमेव सुरगिरा देवनागर्या प्रदेयम्) — 5×4=20

(क) सप्रसङ्गं व्याख्या कार्या —

अथवा कृतवाग्द्वारे वंशेऽस्मिन् पूर्वसूरिभिः।
मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः॥

**अथवा**





MIDNAPORE CITY COLLEGE ESTD 2017 CENTRAL LIBRARY

मनीषिताः सन्ति गृहेषु देवता-
स्तपः क्व वत्से क्व च तावकं वपुः।
पदं सहेत भ्रमरस्य पेलवं
शिरीषपुष्पं न पुनः पतत्रिणः॥

(ख) सप्रसङ्गं व्याख्या कार्या —

न तेन सज्यं क्वचिदुद्यतं धनुः
कृतं न वा कोपविजिह्ममाननम्।
गुणानुरागेण शिरोभिरुह्यते
नराधिपैर्माल्यमिवास्य शासनम्॥

**अथवा**

लभेत सिकतासु तैलमपि यत्नतः पीडयन्
पिबेच्च मृगतृष्णिकासु सलिलं पिपासार्दितः।
कदाचिदपि पर्यटञ्छशविषाणमासादयेन्
न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत्॥

(ग) भावसम्प्रसारणं कार्यम् —

समुन्नयन् भूतिमनार्यसङ्गमात्
वरं विरोधोऽपि समं महात्मभिः।

**अथवा**

कुत्स्याः स्युः कुपरीक्षका न मणयो यैरर्घतः पातिताः।

(घ) विषयमेकमाश्रित्य संक्षेपेण टीका लेखनीया —

सौन्दरनन्दम्, अमरुशतकम्, चौरपञ्चाशिका।

P.T.O.

MIDNAPORE CITY COLLEGE
ESTD 2017
CENTRAL LIBRARY



(ङ) व्याकरणदिशा पञ्चानां पदानां प्रकृतिप्रत्ययौ प्रदर्शनीयौ —

सहेत, समुन्नयन्, गतिः, उद्यतम्, शासनम्, विरोधः, अर्घतः।

(च) (i) व्यासवाक्येन सह पदद्वयस्य समासः निर्णेयः — 2×2=4

अनार्यसङ्गमात्, कृतवाग्द्वारे, गुणानुरागेण।

(ii) सन्धिविच्छेदं कुरु — 1×1=1

सूत्रस्येवास्ति अथवा पर्यटञ्छशविषाणमासादयेन्।

३। प्रश्नद्वयं समाधेयम् — 10×2=20

(क) रघवंशमहाकाव्यमाश्रित्य महाराजस्य दिलीपस्य चरित्रवैशिष्ट्याणि उल्लेखनीयानि।

(ख) पार्वत्याः तपस्यायाः वर्णनं कुरुत।

(ग) वनेचरस्य वक्तव्यस्य सारसंक्षेपः लेखनीयः।

(घ) महाकाव्यरचयितृरूपेण श्रीहर्षस्य कृतित्वं विचारनीयम्।

---